ति नित्यत्वादित्यक्तं सतोत्तादिसामान्यसमवायिकारणं मनसः रूपं यत्र त्यसमवायिनः प्रयत्नवदात्ममनःसंयोगस्य समवायि
न्यात्मनि व्यभिचारनिवृत्त्यर्थं ग्रहणं तेन चाकाशसंयोगस्य पटाकाशसंयोगासमवायिनः समवायिन्याकाशे व्यभिचारनिरासाय विशे
षगुणग्रहणं श्रोत्रशब्दासमवायिकारणोपात्तशब्दसमवायिन्याकाशे सुखाद्यसमवायिकारणमनःसंयोगसमवायिन्यात्मनि व्य
भिचारपरिहाराय परग्रहणं अवयविद्व्यणुकगतविशेषगुणरूपाद्यसमवायिरूपादिपरमाणुवदित्यर्थः वेदांतिमते सुखादी
नां मनोगुणत्वेन परगुणत्वाभावे मनसो नित्यत्व मंगीकाराच्चासिद्धिरिति परिहरति द्वैत्यश्च सिद्धिति व्याप्याद्यासि
द्धिरित्याह द्व्यणुकेति द्व्यणुकसमवायिकारणं तत्परमाणुपरिमाणं यच्च परमाणुपरिमाणं तत् द्व्यणुकसम
वायिकारणमिति सोऽयं समवायिनाम मनसः द्रव्या नं भकत्वानंगीकारेण द्व्यणुकसमवायित्वासत्त्वात् असाध
नाद्याप्यकेन द्व्यणुकसमवायिकारणं तत्परमाणुपरिमाणं यच्च परमाणुपरिमाणं तत् द्व्यणुकसमवायिकारणमि
ति सोऽयं समवायिनाम मनसः सु च पविनाशशब्दान्नित्यत्वे सति स्पर्शवत्वोपाधिना बाहतत्वाद्वाधश्च सिद्धिरित्यर्थः यच्च मनो नित्यं स्प
र्शशून्यद्रव्यत्वादात्मवदित्युक्तं तत्रासिद्धो हेतुनित्यात्मासदास्पर्शातीयच्च मनः स्पर्शहीनं द्रव्यानारंभकत्वात् आत्मवदित्यत्रापि त
दतिमेंद्रियं त्वावयविद्रव्यव्यभिचारनिवारणानद्रव्यानारंभकनिषद्रव्यत्वावांतरजातिरहितत्वस्पादेश्चाकथमुक्तदोषानुषंगः ।
तत्र मानसो ऽनौनिकृत्वेन स्पर्शवत्वादर

नकथंचित्प्रापणंतु मनस्त्वतीति तत्पक्षिणी सोऽदिग्धासिद्धिस्तथा घ्राणत्वनवच्छिन्नवच्छिन्नमनसः स्पर्शहीनत्वसंदेहे द्रव्यान्तं नकनिष्ठद्रव्यवाचो
तन्नजातिरहितत्वस्यापि संदेहात्। किंवा सम्भ्रमतपर्यालोचनेन यामनसोऽपि स्वतुल्या दिव्यत्वपृथिव्यादिकार्यत्वाद्द्रव्यान्तरं न कनिष्ठद्रव्यवाचा
रजातिरहितत्वासिद्धेः स्वरूपासिद्धिः एतेन दमपास्तं यदाहुः यज्जातीयकविशेषोपलब्धिस्तज्जातीयस्पर्शानुपलब्धेस्त्वाद्युत्पद्भव
कल्पते यथा चक्षुर्मनोजातीयस्तु कश्चिदपि स्पर्शानुपलब्धेः कथमुद्भवः कल्पत इति मनसोऽपि पृथिव्यादिजातीयत्वेन तज्जातीयघ
९५ टादौ स्पर्शोपलम्भादवतत्वात्तद्भवकल्पनोपपत्तेः ९३० यद्यपि मनःपरमाणुपरिमाणं मूर्तत्वे सति नित्यत्वात्परमाणुवदिति
२३ न्यथा यदि तत्र प्रतिकूलतर्कपराहतत्वेनाप्रयोजकत्वं तामाह मध्यमेति इच्छाद्यसमवायिकारणसंयोगस्य मनसः परमाणुप
परिमाणत्वे परमाणुपरिमाणत्वे युद्धते न परमाणुप रिमाणत्वमित्यर्थः नच वैभवं युक्तमिति त्याप्यं मत्वाह तत्रानुमानमेवेति
द्रव्यद्वयातिस्पृशः दिक्कालयोरप्रथयस्केवस्य निराकृतत्वान्मनसश्चेतिकधाऽतः कथं नवद्रव्यनिरूपणमित्यत आह तस्मादिति
त्रीत्यर्थः ॥२६॥ ॥ एवं तावद्रव्याणां नवत्वं निरस्येदानीं नवत्वे चकारस्य दशमादिद्रव्यव्यवच्छेदकस्य व्यर्थता माशङ्क्य किंचेति
गुणाश्रयाद्यमिति गुणाश्रयीयद्रव्यलक्षणं तमस्यपि वर्ततइति तस्यापि द्रव्यत्वं वाच्यं इतरथा तत्र द्रव्यलक्षणस्यातिव्यापकत्वा
पत्तेरित्येवकारो व्यर्थ इत्यर्थः ननु कस्य गुणस्याश्रयत्वेन तमसो द्रव्यत्वं प्रथमं तावद्रूपस्येति वक्त्यह तथाहीति ननु भावरूपतम

सः पक्षत्वमालोकाभावरूपस्य वा नाद्यः भावरूपे तमसि प्रमाणाभावेनाश्रयासिद्धेः न द्वितीयः धर्मिग्राहकप्रमाणबाधादित्या
क्यनेत्याह न च तमसाइति न भावरूपमभावरूपं वा तमोऽत्र पक्षः किंतु भावरूपाभावरूपत्वप्रतिपत्त्यालंबनं तमोमात्रं तस्य चोभयथा
वादिसिद्धत्वान्नोक्तदोष इत्यर्थः ननु तथापि भावत्वाभावत्वानालिङ्गितस्याप्रमाणिकत्वादाश्रयासिद्धिः स्पष्टैवेत्यत आह प्रमाणेति
अयं भावः तमोमात्रं प्रतीतं नो वा प्रतीतं चेत्कथमाश्रयासिद्धिः न प्रतीतं चेत्कथं तत्र तथापि भावत्वाभावत्वसंदेहः नहि केनचिदाका
रेणाप्रतीते स्थाणुत्वपुरुषत्वसंदेहो दृष्टः अथ प्रमाणेन न प्रतीतं न प्रतिबिंबादिवत्प्रतीतिमात्रेण स्व
त्वास्यापि पक्षत्वमिति त्वात्प्रमाणविशेषणस्य निरर्थकत्वं त्वादिति न चैवमर्थसिद्धो हेतुः तमसो रूपकत्वे प्रमाणाभावादि
तितत्राह अनुमानेनेति निश्चितमइति रूपविशेषत्वस्य तमसोऽवगम्यत्वान्न स्वरूपासिद्धिरित्याशयः यदत्र
तेनात्र नीलप्रतीतिरस्ति किंतु सितरूपाप्रतीतावेव प्रतीतिर्भ्रमो मंदानां नीलपदप्रयोगस्तु सितत्वाभावे प्रमादसितत्वं नी
लमिति हि लौकिकप्रयोगइति तत्राह अनुमानेनेति नीलस्य प्रत्यक्षादिना मेघस्य नीलरूपवत्त्वयाप्रतीयमानत्वादित्यर्थः
अयं भावः अबाधितनीलरूपप्रतीतेर्यथा हि मेघस्य नीलरूपं सिध्यते तथा तमस्यपि सर्वजनीननीलरूपप्रतीतेरबाधितत्वान्नी
लरूपमस्त्येव विना बाधकं भ्रान्तिकल्पने अतिप्रसंगादिति ईयदन्यद्व्यतोऽलोकनिरपेक्षस्य चक्षुषो रूपप्रत्ययजनक

Dr. Bhau Daji Memorial

त्वानुपपत्तेर्बाधकमिति । तत्राह । अनित्यत्वानुभवगम्यत्वादिति । इदमिहाकूतं आलोकनिरपेक्षस्य चक्षुषो नीलप्रतीतिजनकत्वेऽपि सा हि
त्वे तमसि सा ध्वनीले तमसीति प्रत्ययो न विच्छिद्यते न च तत्र नीलाद्याभावादिति । अपि वा आलोकनिरपेक्षस्यापि चक्षुषो रूपप्रतीति
जनकत्वे किं बाधकं रूपप्रतीतिजनने चक्षुष आलोकनिरपेक्षस्यानुपलब्धेरिति चेन्न । रूपे चक्षुषो रूपप्रतीतिजनकत्वे किंवा
विशेषप्रतीतिजनकत्वे चक्षुष आलोकनिरपेक्षत्वे बाधकाभावात् । आलोकाभावेऽपि नीलघटप्रतीतिप्रसङ्गो बाधकमिति चेन्न ।
२५ तदवस्थायां नहि घटे नीलरूपप्रतीतौ चक्षुष आलो कनिरपेक्षत्वं वदामः । किन्तु नीलत्वावान्तरजातिविशेषयोगिरूप २४
प्रतीतौ घटचक्षुष आलोकानपेक्षत्वं वदामः । किन्तु नी लत्वान्तरजातिविशेषयोगिरूपप्रतीतौ । अत एव तदपादेया
कांक्षः तमसो रूपवत्त्वेऽपि न द्रव्यान्तरत्वं पृथिव्या दिविकान्तर्भावोपपत्तेरिति । तमसो रूपविशेषत्वेन पृथिव्यादिभि
न्यान्यत्वोपपत्तेः । न हि पृथिव्यादीनां रूपवत्त्वमात्रेण भेदः । नाप्यन्यनादिरूपविशेषसमवायेन भेदस्येष्टत्वात् । तमसो रूपवत्त्वप्र
तीतेर्बाधकान्तरमाशङ्कते । ननु रूपवद्द्रव्यमिति । यत्र रूपसमवायस्तत्र स्पर्शसमवाय इति व्याप्तिग्रहात् सर्वजनीना तमसि रूपस्प
र्शानुपलब्ध्या स्पर्शसमवायो व्यापको व्यावर्तमानो रूपसमवायमपि व्यावर्तयतीति तमसि रूपप्रतीतिर्भ्रान्तिरिति तात्पर्यम् ।
तद्दूषयति । न त्र्यणुकवदिति । त्र्यणुकवत्तमसि स्पर्शानुपलब्धेः स्पर्शस्यानुद्भूतत्वादुपपत्तेर्न तत्र स्पर्शसमवायव्याप्ति २६

प्रमाणमित्यर्थः । ननु त्र्यणुककार्यवत्त्वेन त्र्यणुकवत्तमसि स्पर्शानुपलब्धेः स्पर्शोपलब्ध्या त्र्यणुके स्पर्शसिद्धेः तदनुपलब्धेस्तदनुद्भूतत्वं
गतिः कल्प्यते । तमसि तु न स्पर्शसद्भावे प्रमाणं येन तदनुपलब्धेस्तदनुद्भूतत्वं गतिः स्यात् । न तदपि वायौ रूपवत्त्वस्यैव प्रमाणाभा
वात्संदिग्धं तदिति चेन्न । सर्वजनीनरूपवत्त्वस्यैव व्यापकस्पर्शव्याप्यपादकत्वेन तत्संदेहनिवारकत्वोपपत्तेः । नापि रूपमात्रस्यानु
पलब्ध्या संदिग्धेः । अथवालोकवद्युगपद्रूपकस्पर्शव्याप्यसमवायस्यैव स्पर्शसमवायेन व्याप्तत्वात्तमसि चालोकवद्युगपद्रूपसमवा
याभावात्स्पर्शानुपलम्भो बाधक इति हृदयम् । ननु तमो द्रव्यं न वक्तव्यं द्रव्यमवक्तव्यं द्रव्यमनेकार्यद्रव्यं वा स्यात् । न ता
वदकार्यं विनाशोपलम्भाभावात् । नापि तमः कार्यद्रव्यम् । आरम्भकविकल्पबाधात् । आत्मादित्याशङ्क्य नेत्याह । न चानन्तर केति
तमसो रूपवत्त्वोपलब्ध्या द्रव्यत्वस्य विनाशोपलब्ध्या कार्यत्वस्य च सिद्धौ न तदनुरूपाणां तामसपरमाणूनामानियतका
त्वकल्पनोपपत्तेर्नारम्भकविकल्पसमसिद्धमित्यर्थः । ननु तमसो महाकार्यद्रव्यत्वे तद्विनाशे तमःखण्डावयविनो घटविनाश इव कपा
लानामुपलम्भः स्यादित्याशङ्क्याह । विघटदशाविवेति । विघटदादिपत्रनाद्यानां महाकार्यद्रव्यत्वेऽपि तद्विनाशे खण्डावयविनाम
नुपलम्भः स्यादित्यर्थः । अथवा तमसो महाकार्यद्रव्यत्वे कथमविलम्बेनोत्पादविनाशावित्याशङ्क्याह । विघटदशाविवेति । एवं ता
वत्तमसो द्रव्यत्वं प्रसाध्य यदनीयदर्वादितमध्यदं प्रकाशाभावबाधकं । प्रकाशानपेक्षचक्षुर्ग्राह्यत्वबाधकपदत्रासिद्धिप्रतिपन्नानाका

भावबाधकपदस्वस्मात्प्रकाशाभावोस्त्वमद्भ इति । तदनुभाषते यत्त्वा । वादीति । हृष्यति । तदपि मानहीनमिति । प्रेसकत्तस्या तिप्र
संगिचादिति शेषः अतिप्रसंगित्वमेवाह यद्यपीत्यादिना । यद्यालोकनिरपेक्षेण चक्षुषा गृह्यमाणाभावकारत्वात्प्रदेशप्र
काशादर्शनादित्यालोकनिरपेक्षेण चक्षुषालोकाभावस्य गृह्यमाणत्वादालोकाभावो वकारपदार्थ इत्यत्र तेन ह्यालोकसा
पेक्षेण चक्षुषा गृह्यमाणप्रकाशाद्याप्रदेशे तमसोप्यदर्शनादित्यालोकसापेक्षेण चक्षुषा तमसोभावस्य गृह्यमाणत्वात्तमःसं
सर्गाभावः प्रकाशपदार्थ इत्यप्यन्यतामित्यर्थः अत्रा ... यौसंक्षेपार्थः तमस्पदं आलोकनिरपेक्षचक्षुर्ग्राह्यवाचकपदं नचक्षु
आलोकाभावकं बाधकं न विध्यति । विपक्षे बाधका ... भावादालोकपदं तमसो अभाववाचकं आलोकसापेक्षचक्षु २१।
ग्राह्यवाचकपदत्वात्तमसो अभाववाचकपदवदि ... त्यतिप्रसंगपनाहतत्वाद्याप्रयोजको हेतुरिति । नचालोकस्यप्र
पवप्रतीत्यां वृकाभावाद्यन्यच्चमित्यक्तातमसोपिरूपवत्प्रतीत्यालोकाभावादन्यत्वस्य समानत्वात् । किंच आलोकाभावा
पदस्यालोकनिरपेक्षचक्षुर्ग्राह्यवाचकपदत्वासिद्धसाधनविकल्पोदृक्षां तदित्याह । किंच संयुक्तेति । चक्षुःसंयुक्तत्वेनागविशे २५
षणतया चक्षुर्ग्राह्यघटाद्यभावस्य चक्षुषैव गृह्यते माया वाद्यभावस्य साक्षिसिद्धत्वात्तार्किकाणामित्यर्थः अंधकारत्वाद्येन्वद
शः अक्षसंयोगासंभवात् न तद्विशेषणतयालोकाभावश्चक्षुषा गृह्यते विशेषतः घटाद्यभावस्यापि ग्रहणप्रसंगादित्यालोकाभा

वपदस्य चक्षुर्ग्राह्यवाचकत्वाभावाश्राव न खंडमिति न प्रकाशसंसर्गाभावो अंधकारं इत्यर्थः । आलोकस्यालोकनिरपेक्षचक्षुर्ग्रा
ह्यतयातदभावस्यापि लोकनिरपेक्षचक्षुर्ग्राह्यत्वात्रश्चेन्नागस्यप्रस्मृतस्यैव विशेषणेचान्नोक्तदोष इति चेन्न । आलोकालोकावयवा
विनश्यद्वयवाभावेतत्तत्रापेक्षचक्षुर्ग्राह्यत्वापगमात् स्मृतत्वेनागविशेषणस्याद्यत्वस्य प्रत्यक्षे चेत् पुरोदेशवर्तिनो घ
टाभावस्यापि प्रत्यक्षत्वप्रसंगात् । एवं ना... तमसः प्रकाशसंसर्गाभाववर्त्तमानासंभवप्रकृते ... पनीत्य प्रमाणमाह किंचेति । तमसः
प्रकाशजातीयसहत्वविरहस्यासिद्धिमाशंक्याह ... मंदप्रदीप इति । अस्तितावन्मंदप्रदीप इति । अस्तितावन्मंदप्रदीप
परिवर्तिन्यापवरके स्पष्टरूपदर्शनेन तत्र वकार ... णो तत्रासंभवात्तमसात्मदृष्टत्रिः । कल्प्यते । अतोतानासिद्धिरित्य
र्थः । ननु प्रकाशांतरेण प्रकाशीतनाभावस्यापि ... तमसः सहानाक्यिमक्तविपक्षेवाचकाभावात्तत एवमंदप्रदी
पेदेशमन्यस्य स्पष्टरूपदर्शनं प्रकाशांतरसंसर्गाभावादित्याशंकतां यदि तत्रेति । वह्न्यालोकमंडलावच्छिन्नेपि देशे प्रकाशी
तनसंसर्गाभावस्य संभवात्स्पष्टरूपमुपलभ्येतेत्याह । तदिन कादाचिदिति । अनेन न वेकालोकसंज्ञावपिपूर्ववत्तमःप्र
तीतिप्रसक्तिर्बाधिकेत्युक्तं द्रष्टव्यं । किंच चक्षुः प्रकाशनिरपेक्षतया रूपग्राहकं रूपिद्रव्यग्राहकेंद्रियत्वात्त्वगिंद्रियव
दित्यभिप्रायेणाह । अतः सिद्धमिति । नच रूपग्राहकत्वे सति द्रव्यग्राहकेंद्रियत्वमुपाधिः रूपग्राहकत्वे सति द्रव्यग्राहकस्या

पि मनसः प्रकाशनिरपेक्षतया रूपियाहकत्वस्याभावेऽसाध्यासमव्याप्तित्वाद्रूपग्राहकत्वे सति रूपि द्रव्यग्राहकं इंद्रियत्वमिति
चेद्रूपे न रूपग्राहकत्वविशेषणस्य पक्षमात्रव्यावृत्तिप्रयोजनकत्वेन पक्षेतरत्वात् तमसो द्रव्यत्वे प्रमाणांतरमाह छायाया अपीति छा
यं आवस्थमाद्रव्यं क्रियावत्वात् स्पर्शवत्वाद्वा घटवदिति वा सिद्धिः छायायां प्रविरलावयवतमसि क्रियोपलंभस्य सर्वानुभ
वसिद्धत्वात् पथि संतो गच्छतो मनुष्यस्य विनो सुखस्पर्शो नूनं छायानुगमनं ... तिचं सुखो वा व्यक्तो वादित्यलीदन्न विंकाया
९८ द्रव्यपदार्थनिरूपणमुपसंहरति तस्मादिति निरूपितो ... द्रव्यपदार्थतं गानवप्रकारो मुद्रमानतनाबुच्यतीत विश्वप्रसनस्पर्शी ९८
नाः कथं विदालोकन हेतुरस्य ॥ ॥ ॥ इदानीं गु ... णादिपदार्थपंचकं निरूपयितुं निरूपितमपि गुणलक्षणं प्रदीप्र
कारं तरेणनिरूपयितुमुपक्रमते यदपि निर्गुणइ ... त्यादीत्यादिना अत्र गुणासिद्धो गुणलक्षणे शस्य निर्गुणत्वस्या
सिद्धेरसंभावो लक्षणस्येति भावः एवं प्रासंगिकं लक्षणनिरासं परिसमाप्य प्रकृतं विभागनिरासमुपक्रमते यदपि रूपत्वसं
वंधादित्यादिना दूषयति तदपि दुःसंपादमिति अतिव्यापकत्वादिदोषादिति शेषः कथं यत्तावद्रूपसंबंधं सदूषमिति तस्य तावद्रू
पत्वसमवायसंबंधीत्यर्थः तत्र वदामः किं रूपत्वसमवायस्य विशेषणं चक्षुरुपलक्षणं वा नाद्यः रूपत्वस्यापि समवायसंबं २१
धि नित्यत्वापत्त्या समवायत्वसंबंधत्वापत्तौ समवायनाद्येयपलापप्रसंगात् द्वितीये तु रूपत्वे तिद्यापिः तस्यापि सोपल
× रूपत्वसमवायव्यापकं धर्मंतरत्वनाविशख्यानुपपत्ते २

क्षितसमवायसंबंधित्वात् रूपत्वं समवेतं यत्र तद्रूपमिति चेत् न गुरुत्वप्रवितिवंधकत्वस्य यत्र शब्दार्थत्वे सैन वापत्तेः यन्नक
चस्य तदर्थत्वे चक्षुरादावव्याप्तेः रूपत्वसमवायसंबंधित्वे सति तद्धेतुकं रूपमिति चेन्न रूपत्वे तिव्याप्तेः तस्यापि रूपत्वस
मवायसंबंधित्वात् तद्व्यंजकत्वाच्च रूपत्वसमवायसंबंधित्वे सति रूपत्वादन्यद्रूपमिति चेन्न गंधसदावतिव्याप्तेः गंधस्यापि स
मवायेकत्वात् रूपत्वोपलक्षितसमवायसंबंधित्वाद्रूपत्वादन्यत्वाच्च चक्षुषैव ग्राह्यो गुणो रूपमिति चेन्न परमाणुरूपे
व्याप्तेः तस्यातींद्रियनिष्ठत्वेन चक्षुर्ग्राह्यत्वानुपप ... त्तेः चक्षुषैव ग्राह्यजात्याश्रयो रूपमिति चेन्न चक्षुर्ग्राह्यत्वाश्र
किं वा रूपव्यक्तिभेदासिद्धेः कथं रूपत्वजातिः क ... ल्पते अथ नीलपीतधवलादिना वनरूपव्यक्तिभेदः प्रत्यक्षसि
द्धः न रूपत्वजात्यसिद्धौ नीलपीतादीनां रूपव्यक्ति ... त्वासिद्धेः तया च नीलपीतादीनां रूपव्यक्तिभेदत्वसिद्धौ तत्र रू
पत्वजातिसिद्धिः रूपत्वसिद्धौ च तत्संबंधान्नीलपीतादीनां रूपव्यक्तिभेदत्वसिद्धिरिति परस्पराश्रयमित्याह रूपव्यक्तिभेदा
सिद्धाविति अनेन रूपमितरव्यावृत्तं रूपत्वसमवायसंबंधित्वात् चक्षुषैव ग्राह्यगुणत्वाद्वा व्यतिरेकेण गंधादिवदित्य
पास्तं एवं स्मादिष्वपि लक्षणनिरासो द्रष्टव्यः किं तु संख्यायाः किंनिदर्शनं एकत्वादिव्यवहारहेतुत्वं वा संख्यात्वजातीयत्वं वा १
न प्रथमः समवृत्तिनेकत्वादिव्यवहारहेतुत्वस्यासिद्धेः एकत्वव्यवहारहेतोः संख्यात्वद्वित्वादिव्यवहारहेतुत्वं संख्यात्वं तस्यात्

न द्वितीयः संख्यायाः जातिसद्भावे प्रमाणाभावात् एकस्मिन्द्वयोस्त्रिषु च संख्यातमिति प्रयोगोऽप्यत्र प्रमाणमिति चेत् न महत्परिमित
दीर्घादिपरिमाणे तुलापरिमितगुरुत्वे चावांतरैकजात्यभावेऽपि परिमितप्रयोगवदेकत्वद्वित्वादिषु संख्यावज्जात्यभावेऽपि तद्विशिष्ट
संख्यातप्रयोगोपपत्तेः न चैकत्वद्वित्वादिषु संग्राहकगुणत्वावांतरैकजात्यनंगीकारे रूपरसादीनामिवैकत्वद्वित्वादीनामपि
विजातीयगुणत्वप्रसंगः ननु सतावद्दोषस्त्वद्वादेऽपि तुल्यः तस्माज्जिः श्रुतपरत्वैकत्वादीनां विजातीयगुणत्वमंगीकार्यं
६८ न्यायदोषाभावान्मनोन्नवनादरमपि नित्यनितसनः आय तो गुणानां चतुर्विंशतिसंख्याघातइति चेत् तर्हि किमिदानीं प्रत्यर्थि ६८
नृपनिरासेऽपि नृपांतरं दुःखाकरोतीयेन गुणादौ विभागनियमं निराकुर्वाणो विभागनियमनिराकरणप्रसंगात्
वनिराकरोत्यायुष्मान् किं वा एकत्वस्य सामान्य रूपत्वे कोऽविरोधः द्रव्यत्वेन तुल्यव्यक्तिकत्वमिति चेत् न एकत्वस्य
गुणादावपि वृत्तेर्द्वैरूप्यमाणत्वात् द्रव्यत्वैकत्वयोस्तुल्यव्यक्तिकत्वेनान्यतरस्य सामान्यत्वत्यागश्चाग्रहः किमित्येकत्वस्यैव सामान्य
त्वत्यागो विशेषाभावात् अनित्यत्वादिति चेत् न तदसिद्धेः द्वित्वादेस्तु द्वित्वादिकागतिरिति चेत् न कार्यस्य पृथक्पृथक्त्वाभावात् कथं
तर्हि एकत्वेऽपि त्रय इत्यादिव्यवहार इति चेत् बुद्धिविशेषादिति ब्रूमः तथा हि यथा नवन्मते अयमेकोऽयमेक इत्यपेक्षाबुद्धेर्द्वि २२
त्वोत्पत्तिस्तथा विनापि द्वित्वोत्पत्तिमपेक्षाबुद्धेरेव द्वित्वव्यवहारोऽस्माकमिति न किंचिद्दुष्यति एकविद्धित्वाभावे कथं तदाकारता

व्यवहारस्येति चेत् तर्हि किमिदानीं द्वित्वमपि एकत्वविषयमात्रस्याश्रयं तस्मादपेक्षाबुद्धिरेव विचित्रादेव द्वित्वादिव्यवहार एवं त्रयमिति न संं
ख्यासिद्धिः ननु संख्याभावे कथमनेकत्वसंख्यायाः कार्यं महत्त्वस्य परिमाणविशेषस्योत्पत्तिरिति चेत् आश्रयविशेषस्य परि
माणमेव किं न स्यात् मानव्यवहारकारणमिति चेत् कार्यमानव्यवहारश्च रूपवित स्यादिव्यवहारो न वा अणुमहद्व्यवहारो वा असर्व
गतत्वव्यवहारो वा परिमितत्वव्यवहारो वा नाद्यः परमाणुपरममहापरिमाणयोः परिमाणत्वाभावप्रसंगात् न द्वितीयः ह्रस्वत्व
दीर्घत्वयोः परिमाणत्वाभावापत्तेः न तृतीयः गु णादावपि परिमाणप्रसंगात् परममहापरिमाणवत्परिमाण
त्वाभावप्रसंगात् न चतुर्थः तुलापरिच्छिन्नगुरुत्व स्यापि परिमितव्यवहारेण च न परिमाणत्वप्रसंगात् न च परिमि
तव्यवहारस्तुलानिरूपितायां विसंख्याविषय इति चेत् तर्हि द्यांतरसमवायनिर्वचनं परिमितव्यवहार इति न परिमाण
सिद्धिः कथं तर्हि अणुत्वपरिमितव्यवहार इति चेत् न कथं विना परिमाणत्वजात्यसिद्धावणुत्वस्य वासिद्धेः व्यवस्थापितोत्रयणुकोपादा
नैः गुणत्वावांतरजात्या महत्त्वैकजातीयगुणवत्त्वं द्रव्यत्वात् घटवत् यस्तु त्र्यणुकोपादानद्व्यणुकमहत्त्वैकजातीयगुणः तन्नम
हत्त्वं द्व्यणुकप्रत्यक्षतापत्तेः अतः अणुपरिमाणसिद्धिरिति तत्र वदामः किं महत्त्वजात्या एकजातीयगुणवत्त्वं साध्यं जात्यैतनेणा
वा नाद्यः द्व्यणुकादावपि महत्त्वापत्त्या प्रत्यक्षत्वप्रसंगात् न द्वितीयः तदसिद्धेः नानाद्रव्यसाधारणजातिमात्रेणेति चेत् न

इन्ये ५ ४ का २ ९

दपिमहत्त्वंवातदतिरिक्तंचेतिगतदोषतद्देवच्छं।महत्त्वस्योपाधिकत्वात्।किंचमहत्त्वसद्भावेपिनप्रमाणंपश्यामः।वहुतरंद्रव्यसम
वायेनैवमहदितिप्रत्ययोपपत्तेः।आत्मादौचमहत्त्वप्रत्ययस्यसर्वाश्रयवक्ष्यमाणनिर्वचनत्वात्।ननु।किमवयववहुत्वमात्रेमहदिति
प्रत्ययगोचरवहुत्वविशेषोवा।नाद्यः।तस्यमहदल्पसाधारणत्वात्।उभयत्रप्रत्ययउत्पत्तिप्रसंगात्।द्वितीयेपिकिमवगतोवहुत्व
विशेषोमहदितिप्रत्ययगोचरः।अनवगतोवा।नाद्यः।अवयववहुत्वेयत्ताऽनिश्चयेपिघटादौमहदितिप्रत्ययात्।नद्वितीयः।मह
७८ त्वप्रकर्षापकर्षप्रतीत्यनुदयप्रसंगादितिचेत्। अत्रोच्यते।किमत्रमहत्त्वप्रतीतिमात्रस्यगोचरंपृच्छसि।महत्त्वप्र
कर्षापकर्षप्रतीतेर्वा।आद्येऽवयववहुत्वमात्रंत गोचरइतिवदामः।द्वितीयेतुवहुत्वविशेषावगतः।तद्वगतेस्त ७८
प्रत्यक्षादेवा।किंवाऽनवताश्रयवहुत्वविशेषात् वगमादेवमहत्त्वविशेषावगतिरेष्यात्।इतरथा[illegible]त्वद्व्यव धा
दे४ स्थितिपरिमाणविशेषसंदेहोनस्यात्।तस्मान्नपरिमाणसिद्धिः।ननुमहदल्पपरिमाणभेदाभावेकथंमहतोऽल्पंपृथगिति
चेत्।पृथक्त्वस्यैवतावत्किंप्रमाणं।पृथगितिप्रत्ययइतिचेत्।न।तस्यान्योन्याभावविषयत्वात्।घटःपटान्नभवतीत्यन्यो
न्याभावविषयप्रतीतेर्घटात्पटःपृथगितिप्रत्ययस्याविलक्षणत्वात्।एकविषयत्वमितिचेत्।न।तत्रधर्मस्यैवान्योन्याभावस्यपृथगादिश
ब्दवाच्यत्वोपाधिनिर्वचनत्वेनप्रत्ययवैचित्र्योपपत्तेः।ननुनशब्दभेदोपाधिनिर्वचनं।प्रत्ययभेदः।किंत्वर्थभेदनिर्वचनपूर्वक

शिव ३

अन्योन्याभावस्यप्रतियोगिसापेक्षत्वेनप्रतीतेःपृथक्त्वस्यचावधिनिरूप्यत्वेनप्रतिभासादितिचेत्।अवधिप्रतियोगिनोरर्थभेदा
भावात्।यथोच्यते।अवधिप्रतियोगिनोरर्थभेदाभावे।वक्ष्यमाणविधप्रतियोगिन्यपिपंचमीप्रयोगप्रसंगः।सचानिष्टः।नहिघटा
त्पटोनेतिप्रतीतिर्दृष्टचरीति।तत्रोच्यते।नह्यवधौपंचमीविधानेनैवावधिप्रतियोगिनोर्भेदात्प्रतियोगिन्यपिपंचमीप्रसंगः।
किंत्वन्यादिपदयोगात्।अतःपृथक्त्वस्यान्योन्याभावरूपत्वेपिघटःपटान्नभवतीत्यत्रनपंचमीप्राप्तिरन्यादिपदप्रयोगाभावात्।घ
टात्पटोऽन्यइत्यादौतुस्यादन्यादिपदयोगादिति संताक्षयौ।अथोत्परादिनरार्थिदिच्छद्वैध्वनपदानाहियुक्तइति
पृथगन्यपर्याययोगेपंचमीविधानमितिनत्वान्य पर्यायत्वेघटःपटोनेत्यत्रापिपंचमीप्राप्तिः।तदपिवानत्वेक
विशेषोन्योन्याभावविषयत्वेनाभावमात्रवाचक चेनान्यपर्यायत्वाभावात्।अन्यथातदभाववत्तदन्यस्मिन्नपिन
८ त्रःप्रयोगाद्दृष्टमतपर्यायत्वेनयापिनत्रोऽन्यपर्यायत्वादिदमिदंनेत्यत्रपंचमीप्रयोगप्रसंगस्यसमानत्वात्।तस्मादन्यादि
शब्दविशेषनिर्वचनत्वमेवपंचमीविधानेनपृथक्त्वस्यैवनिर्वचनमितिनपृथक्त्वसिद्धिः।एतेनद्विपृथक्त्वमथ्याद्यन्योन्या
भावस्यद्विनिष्ठत्वेनप्रतीत्यपपत्तेः।पृथक्त्वस्यचान्योन्याभावरूपत्वेगुणादावपिरूपादस्पृथगितिप्रत्ययोपिविनावाधेनत्वं
तःकल्पितःस्यादिति।ननुघटपटयोःपृथक्त्वाभावेसंयोगानस्यादितिचेत्।संयोगस्यैवतावत्प्रमाणंपश्यामःद्रव्यद

शिव ३

यांतरेण संयुक्तमिति प्रत्यय एव संयोगे प्रमाणमिति चेत्‌ न । यद्दवस्थद्रव्ययोर्जवतां संयोगोत्पत्तिस्तद्दवस्थयोरेव संयुक्तप्रत्ययविष
यत्वोपपत्तेर्यद्यसंयोगानंगीकारे द्रव्यगुणकर्मणामनुत्पत्तिरेव स्यात्‌ । अवयवसंयोगमन्तरेण द्रव्योत्पत्तेरसंभवात्‌ परमाणूनाम
ग्निसंयोगमंतरेण पाकजरूपाद्यनुपपत्तेः बुद्ध्यादीनामात्ममनःसंयोगमंतरेणानुपपत्तेः तृणादावेव वायुसंयोगमंतरेण क्रियानु
त्पत्तेः अतः संयोगापह्नवे द्रव्याद्युत्पत्तौ तदपि न विलक्षणपरीक्षाक्षमम्‌ ईक्षामहे संयोगसामग्र्या एव द्रव्याद्युत्पत्तिसिद्धेः तथाहि द्व्यणुकद्र
२५ व्यारंभकसंयोगसामग्र्यास्तस्या एव द्रव्योत्पत्तिसिद्धौ किं मध्यवर्त्तिसंयोगकल्पनया बुद्ध्यादौ वह्न्यादि क्रियायां वा दृष्टम
स्य परिमाणविशेषस्य वा यित्वे समवायित्वं न विद्य ति संयोगस्वरूपानिरुक्तेश्च तथाहि किमप्राप्तयोः प्राप्तिः सं २५
योगः अनित्यसंबंधो वा द्रव्यासमवायिकारणी गुणो वा न प्रथमः अप्राप्तिर्हि प्राप्तेः प्रागभावो वा प्राप्तेरत्यंताभा
वो वा स्यात्‌ नाद्यः अनित्यसंबंधस्य सिद्धौ प्राप्तिप्रागभावासिद्धात्‌ लक्षणस्यासंभवापत्तेः न द्वितीयः संसर्गाभाववादे च न सिद्धि प्राप्ते
रत्यन्ताभाववतोऽप्राप्तिः संभवेन विना न द्वितीयः अनित्यसंबंधसद्भावे प्रमाणाभावात्‌ क्रियाद्यन्वयव्यतिरेकौ प्रमाणमिति चेत्‌
न सिद्धस्यैव संबंधस्य संबंधव्यवच्छेदकत्वेन तयोरन्यथासिद्धेः यथा तंतुपटसमवायिस्यकारकव्यापारान्वयव्यतिरेकयोरवच्छेदक
तयान्यथासिद्धिः अन्यथा समवायस्याप्यनित्यत्वापत्त्या तित्यापकत्वापत्तेः न तृतीयः द्रव्यासमवायिकारणस्य गुणत्वे प्रमाणा

कार्यत्रयत्रिज्ञानुपपत्तिस्त्वकर्मासमवायित्व एव संयोगासमवायत्व पार्क्षपि
प्रमानबुद्धेः चोप्दो ६

भावात्‌ कार्यद्रव्यं असमवायिकारणगुणजन्यं क्रियाद्युत्पाद्यत्वे सति भावकार्यत्वात्‌ रूपवदित्यनुमानं मानमिति चेत्‌ तदपि
न मनीषिमनः समुल्लासायितुमीशं एव संमतसंयोगानुकूलक्रियायाः एव द्रव्योत्पादकत्वांगीकारेण हेतोः असिद्धत्वात्‌ अ
वयवक्रियाविशेषस्यैव द्रव्यासमवायिकारणत्वे तन्नाशे द्रव्यनाशः स्यादिति चेत्‌ न असमवायिनाशस्यारंभकावयवानां का
र्यप्रतिकूलक्रियान्तरोत्पादस्य वा कार्यद्रव्यविनाशहेतुत्वस्य क्लृप्तत्वात्‌ कथं तर्हि तंतुविभागात्‌ पटनाशोपलब्धिरिति चेत्‌ न
तु विभाग एव किं प्रमाणं विभक्तप्रतीतिरिति चेत्‌ प्रमाणमिति चेत्‌ न यादृगवस्थद्रव्ययोर्विभागोत्पत्तिर्भवतीता त्प५
दृगवस्थद्रव्ययोरेव विभक्तप्रतीतिविषयत्वोपपत्तेः संयोगध्वंसविषयत्वोपपत्तेर्वा न च ध्वंसस्यैकसंयोगि
विनाशेन संयोगनाशे विभक्तप्रतीतिः स्यात्‌ अको भूतेन स्यादिति तस्मिन्नष्टे तेनायं विभक्त इति प्रतीतेः सर्वजननी
न चानयोः संयोगविनाशेन संयोगविशिष्टद्रव्ययोर्वा विभक्तप्रतीतिविषयत्वं स्वविशेष्याभावोविशिष्टप्रतीतिप्रसक्ती
तिप्रसक्तिर्लोकप्रसिद्धेति न च संयोगिनाशे विभक्तप्रतीतिप्रसंगः अपि च विभागोऽपि किं न स्यात्‌ संयोगपूर्वकोऽविश्लेषो वा
संयोगविरोधी गुणो वा संयोगनिष्ठात्यंताभावप्रतियोगिनित्यमात्रनिष्ठात्यंताभावप्रतियोगिकालनिष्ठनिष्ठात्यंता
भावाप्रतियोगपपेक्षाबुद्धिजन्यानिष्ठगुणत्वावांतरजातिमान्‌ वा नाद्यः विश्लेषशब्देन विभागाभिधाने विभाग एव विना

संयोगस्यापिपार्थिवपरमाणोसंयोगव्यतिरिक्त पाकजरूपाद्युत्पत्तावसमवायित्वेनहेतोर्व्यर्थविशेषणत्वेन ॰

गनिरूपणापत्तेः संयोगशून्यत्वेकइतिविशेषणविफलत्वापत्तेश्च। संयोगविरोधिमात्रानिरूपणेसंयोगविनाशेः निद्याभेः। नद्वितीयश्च
आत्ममनःसंयोगविरोधिस्वहस्तेःतिद्यापिःक्रियाजन्यत्वेसतीत्यत्रनाश्रहस्तस्यापितीर्थयात्रादिक्रियाजन्यत्वात्। असमवायित्वेनक्रि
याजन्यत्वेसतीतिवत्रनेडुतुरतराश्रयात्संयोगविभागसिद्धौतदसमवायिकारणंक्रियासिध्यतिक्रियासिद्धौवासमवायित्वेन
क्रियाजन्यःसंयोगविरोधीविभागःसिद्ध्यतितत्सिद्धौ वसंयोगविभागसिद्धिरितितानतृतीयः तथाभूतजातावेवप्रा
९२ गुरुनीत्या इतिव्यापकत्वात्। तथाभूतजातिविशिष्टेवाव्यापकत्वात्। तथाभूतजातिसद्भावप्रमाणाभावा
त्। संयोगविभागमात्रनिष्ठात्यंताभावप्रतियोगि नित्यमात्रनिष्ठात्यंताभावप्रतियोगिकालनिष्ठनिष्ठात्यंता
भावप्रतियोगपापद्ग्राबुद्धिजन्यानिष्ठगुणत्वाव्यांतरजा तियोगिनोगुणांतरस्यापि वैकल्पनायत्तेश्च। यद्यपिकर्मात्
विभागसिद्धौकर्मसंयोगातिरिक्तासमवायिकारणंसमवायिकारणात्वात्रूपवदितितत्रक्रियापोयापवद्व्या
समवायिकारणत्वांगीकारासिद्धसाधनं। अथसंयोगव्यतिरिक्तगुणासमवायिकारणत्वंसाध्यते। तर्हि
गुणेद्वोपाकूवादीयतांदृष्टसिद्धं। अपिवाकर्मसंयोगविभागातिरिक्तासमवायिकारणं। संयोगविभा

असमवायित्वेतिसंगानसमवायित्वेपायो योगातिरिक्तत्वसतित्र

करण

गव्यतिरिक्तत्वेसतिअसमवायिकारणत्वात्। रूपवदित्यतिप्रसंगपरहेतत्वादहन्त्वलनतर्कानावाद्या
प्रयोजकतेत्यत्रविभागगवैणयासंयोगविभागानंगीकारेकथंपरत्वापरत्वयोःप्रतीतिरिति
वेत्। परत्वापरत्वयोरेवक्रियमाणे परापरप्रत्ययाविति वेत्र। नासूर्यपरिवर्त्तनदेश
संयुक्तसंयोगाल्पत्वबहुत्वयोरेव पपरत्वापरत्वयोरेवक्रियमाणे। परापरप्रत्ययावि
रापरप्रत्ययनिमित्तत्वात्। यद्वाच्यते। संयुक्तसंयोगाल्पत्वबहुत्वयोरेवपरापरप्रत्ययनिमि
त्तत्वेप्रमातर्यपिपरापरप्रत्ययप्रसंगःसत्त्वापितयोरविशेषादिति। तदपिमंदंसत्त्वेनमतेपि

पत्र २

संयुक्तसंयोगाल्पत्वमहत्त्वयोः परत्वापरत्वोत्पत्तिहेतुत्वेन प्रमातर्यर्पितयोरविशेषेण परत्वाप
रत्वयोरुत्पत्त्यापरापरप्रत्ययप्रसंगस्य समानत्वात्। यद्यप्येवं तत्संयुक्तसंयोगाल्पत्वमहत्त्वयो
योर्मूर्त्तेष्वपरत्वापरत्वोत्पत्तिहेतुत्वसाम र्थ्यान्न प्रमातर्यर्पितत्वमित्यापत्तिरिति। तर्हि मूर्त्त
२३ विशेषणयोरेवसंयुक्तसंयोगाल्पत्व महत्त्वयोः परापरप्रत्ययनिमित्तत्वमिति न २३
प्रमातर्यर्पितत्वप्रत्ययप्रसंग इति स मानं। तस्मान्न परत्वापरत्वसिद्धिः। तत्र लक्ष
तासंयुक्ते ६ यतदन्नावत्वापि। अव्याप्तेरधिकव्याप्तेर्निरासो लक्षणस्य च। बुद्ध्यादेर
अवार्वद्द्रव्यः प्रत्येकंयंथगोरवात्। नीतेनीकानिसा स्मीलिध्यथथथथददददघघघननननन ८१

प्रप

तु वस्त्रविकावयवसंयोगादौ। ४

विशेषगुणाद्वैलक्षण्यं स्याश्रयस्यपृथक्त्ववच्छेदहेतुत्वं तरजातियुक्तगुणश्चेदिति तत्र स्यात्स्वशब्दार्थो निरुक्तितः गुणमात्रानिधाने स्या
त्संख्यादेरपि संग्रहः तद्विशेषाभिधाने स्याद्व्याप्तिस्तदसंक्रमात्। द्रव्यस्य द्रव्यविच्छेदारोपकव्याप्यजातिमान् गुणश्चेदधिकव्याप्तिः गुरु
त्वादेः यदीष्यते द्रव्यत्वावान्तरैकस्य सामान्यस्य यदाश्रयः तद्व्यवच्छेदहेतुत्वं विशेषत्वं गुणे तदा। शब्दव्याप्तिरथैकस्य गुणस्याश्रयभेद
का विशेषत्वं गुणे ज्ञेयातिव्याप्तिः स्यान्न्यूनवर्त्तिनि॥ ॥किं वा गुणानां चतुर्विंशतित्वसंख्याविशेषविरूपनमप्यसंगतं संख्यालक्षणगुणाश्रय
त्वेन द्रव्यत्वप्रसंगादित्याह। किं च चतुर्विंशतीति। ननु रूपादिषु चतुर्विंशतित्वस्यौपचारिकत्वान्न द्रव्यत्वप्रसंग इति। तत्रा
ह। नन्वौपचारिक इति। नन्वौपचारस्य कारणपूर्वकत्वं किं नियामकमिति तत्राह कार्यादिति। सुखादिशब्दार्थगुणादिसंयोगं विना
उपचारः सर्वत्र सिंहादिशब्दोपचारः स्यादित्यर्थः। अस्तु तर्हि संख्यावद्द्रव्यसमवायो गुणेषु संख्योपचारकारणमित्याशंक्याह। न
स्यादिति। संख्याविशेषेति। न संख्यावद्द्रव्यसंबंधिनि गुणे चतुर्विंशतित्वोपचारः। किं तु संख्यामात्रोपचारः स्यात्। अथ द्रव्ये चतुर्विंशतित्व
स्यापि नावान्तरसंबंधिनि गुणे तदुपचारः तर्हि द्रव्ये नाद्यादिसंख्याविशेषस्यापि संबंधात् तत्संबंधिनि गुणे तदुपचारोपि स्यादित्यर्थः। ना
न्यनेकसंख्यावद्द्रव्यसंबंधिन्यपि गुणे चतुर्विंशतित्वस्यैवोपचारो गुणानां न्यूनाधिकसंख्यानिवारणार्थो न विद्यत इत्याशंक्याह। ना
न न्यूनेति। गुणेषु वाक्यवत्चतुर्विंशतिसंबंधाभावे कथं तन्न्यूनाधिकसंख्यानिवारणं शक्यं न हि तद्वदन्यस्यौपचारिकसिद्धये नाहि सिं

७४

हन्त्र निवारणेशक्यमित्यर्थः किंवा गुणानां चतुर्विंशतित्वप्रतिज्ञायते अन्यूनानतिरिक्तसंख्यानिर्देशोद्धिवक्तितान चतुर्विंशतिलक्ष
मवाप्यद्वद्विगुणोपनत्वचतुर्विंशतित्वापेक्षयान्यूनाधिकसंख्ये नापि चतुर्विंशतित्वमित्यसंख्याताज्ञ इत्यर्कस्यात्र तथा च गुणानां चतु
७२ र्विंशतिप्रतिज्ञायाः असंख्यातत्वप्रतिज्ञाद्योप्रक्षालनादिपंकस्यदूरादस्पर्शनं वरमिति न्यायादित्याह संख्याहीनत्वे तिपर्वेता वर
रूपादीनांस्वरूपानिर्वचनेनचतुर्विंशतित्वसंबंधनिरूपणेनचगुणानांचतुर्विंशतित्वनियमंनिराकृत्येदानीमाविकल्पप्रदर्शनेनतन्नि
२६ ८२ राकुर्वन्नाह कारणादयनिपठितेतिनत्वक्रोधेद्वेषः शौर्यप्रयत्नइतिनाधिकंमितिसांप्रतंक्रोधस्यद्वेषकार्यत्वेनतता २६
न्यत्वस्यशौर्यस्यचप्रयत्नमात्रप्रयोगादर्शनेनत तोऽन्यत्वस्यानुभवसिद्धत्वात् इतरथाद्वेषस्यापिप्रतिकूलेच्छामात्र
रूपत्वेनेच्छाद्वेषयोरपिभेदाभावप्रसंगादितिद्रष्टव्यं आदिशब्देनलोभालस्यौदार्यकाठिन्यलघुत्वादयोगृह्यंते यावत्तेषां
लीलावतीकारोक्तानांतत्रान्यथासिद्धिः साधनवविरुद्धत्वादतिप्रसंगित्वाच्चोपेक्षणीयेतिसंक्षेपः कर्मणांपंचत्वनियमंनिराकुर्वन्नाह
ह कर्मणामपीतितथेतिशिष्यादेशामनमात्रमित्यर्थः वक्रादौभ्रमणस्पंदनादूर्ध्वज्वलनस्यवायोस्तिर्यक्पवनस्यदर्शनान्नपंचे ८२
वकर्माणीत्यर्थः अथभ्रमणादेर्गमनविशेषत्वंमनेनभाव्वतद्रूपेणापरापिगमनवत्तिजातिभेदप्रमाणाभावाद्गमनमेवैकंकर्मस्यादित्या
हातस्यापीतिनत्वगमनेनावश्यंसिद्धमित्यत्रैतदतिरिक्तमाह गमनमपीतिगच्छतोगमनेनवच्छिन्नादगच्छतोगमनेवा

गा २

८२

गमनस्यदुर्निरूपत्वाद्गौतमात्रगोचरत्वमेवेत्यर्थः अथगमनप्रत्यवगतागमनमितिनाक्रदोषः तदपिवार्तंगमनप्रागभावापिग
च्छतोऽगच्छतोवेतिविकल्पद्वयदोषस्यसमानत्वादितियेतुसौगताः प्रतीतिमात्रगोचरमपिकर्मनस्वेतितान्प्रत्याहानवगाह्नीतिचप्र
लतिप्रत्ययस्यनिरालंबनत्वप्रसंगादित्यर्थः ननुक्रियाभावेपिचलतिप्रत्ययस्यसंततयोगविभागालंबनत्वान्ननिरालंबनत्वमि
त्याशंक्यानत्याहानैवासावितिखात्तः स्थिनीमध्यमध्यमासीनः श्रीदावंशसासततसंयोगविभागाश्रयेचलतिप्रत्ययप्रसंगादिति
शेषः किंवगगनस्यापत्यक्षत्वेनतेनसहपक्षिणोसं योगविभागयोरप्रत्यक्षत्वाद्गगनेखगोगच्छतीतिप्रत्ययानस्या
दित्याह खगगमनसंयोगस्येतियदपिकश्चिद्रूप तोसंयोगविभागौकादाचित्कातिशयवत्कारणजन्यौकार्य
त्वाद्घटादिवदितिसंयोगविभागाभ्यांनित्यानुमेया त्वेतितदपाकाशपक्षिसंयोगविभागयोरप्रत्यक्षत्वेनालिंग
त्वादाकाशेपक्षीगच्छतीतिप्रत्ययाभावप्रसंगेनापास्तमित्याहाग्रतएवेतिआकाशस्यवाअत्यक्षत्वमरूपिद्रव्यत्वादितिद्रष्टव्यंकिं
चासंयोगविभागयोः कादाचित्कातिशयजन्यत्वाभावेवाधकाभावादप्रयोजकताहेतोः नचसंयोगविभागयोर्द्रव्यमात्रजन्य
त्वेसदोत्पत्त्यापत्तिर्बाधकमितिसाधवत्तीनवदविषातिशयजनकसामग्र्यापवसंयोगविभागजनकत्वादित्याहायतः क्रियेतिकिं
चसाध्यसेऽतिशयोऽतिशयान्तरजन्योनवा द्वितीयेतत्रैवकार्यत्वस्याभ्यनिवारः प्रथमेऽनवस्थातस्यनस्याध्यतिशयस्यातिश

वाच्यवाचकभावाः परस्पराश्रयादिधीनसिद्धत्वादि यथा

x कर्मेति सिद्धं १

यांतरस्वर्वकत्वादित्याह।साधनतिशब्देवेति।तस्माज्जातिमात्रसिद्धं।सामान्यविनागंनिनाकेनेति।सामान्ये इति एकस्मिन्सामान्ये स्वीक
त्वसिद्धो।तदपेक्षयान्यस्मिन्सामान्येन्यूनवृत्तित्वसिद्धिस्तत्सिद्धौ च तदपेक्षयायं तत्राधिकवृत्तित्वसिद्धिरिति।परस्पराश्रयमित्यर्थः।किं
सामान्यानां परापरभावानंगीकारे किं बाधकं।यत्र पार्थिवत्वं न तत्रेंद्रियत्वं घटादौ यन्निवारणात् यत्रेंद्रियत्वं न तत्र पार्थिवत्वं चक्षुरादौ
निवारणादिति परापरभावशून्ययोरपि पार्थिवत्वेंद्रियत्वेन तत्रेंद्रियत्वं घटादावनिवारणात् यत्रेंद्रियं नेति परस्पराश्रयमित्यर्थः।किंच सामा
२५ न्यानां परापरभावानंगीकारे किं बाधकं।यत्र पार्थिवत्वं न तत्रेंद्रियत्वं घटादौ यन्निवारणात् यत्रेंद्रियत्वं न तत्र पार्थिवत्वं चक्षुरादौ
८३ यन्निवारणादिति परापरभावशून्ययोरपि पार्थिवत्वेंद्रियत्वयोर्घ्राणे समवायप्रसंगस्तथा शरीरत्वपार्थिवत्वयोरस्मदादि
श्री शरीर इति वक्तव्ये घ्राणे इत्यनुगतमतिप्रावसामान्यकल्प नाहेतुरतो घ्राणेपि पृथिवीत्वमनुगतमरेंद्रियमिति मतेश्चास्मदादि
न्यप्रसंगस्येष्टत्वात् नन्वेवं सति घटत्वपटत्वयोरप्येकस्मिन्समवायः स्यात् स्यादिष्टोयं घेकस्मिन्नपायीनुगतमतिः स्यात् किंचापार्थि
वत्वेंद्रियत्वयोः परापरभावानुपपत्त्या तत्परस्य सामान्यत्वत्यागे इंद्रियत्वस्येव तत्त्यागे न पार्थिवत्वस्येति नियमे बीजाभावे विनिगमनावि
प्रमाणमप्येनयत्र तुल्यत्वादिति।किं च सामान्यस्य सर्वगतत्वमूरीकृत्य तस्य परापरभावाभावार्थं नेन पुंसकमुक्ताघस्मयाः प्रत्यर्थं नमिवाव
स्यामितथामतिसर्वसामान्यानां सर्वत्र समवायेन परापरभावानुपपत्तेः स्यादयं दोषः।सामान्यस्य व्यक्तिसर्वगत्ववादिनां वैशेषिकाणां

MEMORIAL

तृतीयेत्वात्मादिवत्सामान्यस्यापि स्वसत्तापर्यवसायित्वात् किं यद्व्यक्तिपारतंत्र्येपि प्रमाणं इति सामान्यवद्व्यक्तिरनेकवृ
त्तित्वाभावादित्यर्थः।नन्वगोत्वादेः सर्वव्यक्तिसर्वगतत्वे घटादावपि गौरिति प्रत्ययप्रसंगइत्यतआह तस्मादिति गोत्व
स्य सर्वव्यक्तिसंबंधेपि सास्नादिर्यथा खंडादावेव गौरिति प्रत्ययो न घटादौ व्यंजकाभावादित्यर्थः।तदेवं सर्वसामा
न्यानां सर्वव्यक्तिसंबंधे परापरभावानुपपत्तिरिति सिद्धं।विशेषं दूषयितुमाह।यद्वा अस्मदादीति।समानजातिगुणकर्म
कार्यात्परमाणवः अन्यान्यव्यावर्तकधर्मसंबंधिनो न भवितुमर्हति।व्यावृत्तज्ञानविषयत्वात् घटादिवदि
त्यनुमानाद्यदंत्यविशेषकल्पनमित्यर्थः।परिहरति।तदयुक्तमिति।योगिनां परमाणुबुद्धावृत्तिज्ञा
सिद्धः।योगिनां व्यावृत्तकल्पनं विशेषकल्पनाबी नमिति।व्यावृत्तिज्ञानसिद्धौ तद्विषयत्वेनांत्यविशेषसिद्धिः
तावत्सिद्धौ च ज्ञानसिद्धिरिति परस्पराश्रयत्वे तद्धेतोरसिद्धत्वादित्यर्थः।यद्वा अस्मादीतरं समानजातिगुणकर्मकार्यात्पर
माणवः अन्यान्यव्यावर्तकधर्मविशिष्टबुद्धिविषयाः।इदं यद्वात्र घटादिवदिति।तत्राहादार्थोरिति।परमाणूनामन्या
न्यव्यावर्तकप्रत्यक्षधर्मविशिष्टबुद्धिविषयत्वेनार्थांतरत्वात् नांत्यविशेषसिद्धिरित्यर्थः।यद्वा अन्यत।यद्येवं परमाणु

MEMORIAL

PAGE(S)MISSING

NOT AVAILBLE

84

वृत्तित्वपृथक्त्वं न तस्य परमाण्वंतराद्व्यावर्तकत्वं तस्य परमाण्वंतरवृत्तिना पृथक्त्वेन सदृशत्वादिति। तदपि वार्त्तं पृथक्त्वस्य
व्यावर्तकत्वाभावे व्यावृत्तबुद्धिविषयत्वासंभवेन तस्यैवापलापप्रसंगात् विशेषेषु समानत्वाद्वेति यच्चेदमनुमानं सत्तासा
मान्यसमवायव्यतिरिक्तभावासंसर्गिणी जातित्वात् गोत्ववदिति। तदपि न मानं विपक्षबाधकाभावेन सत्तासामान्य
विशेषसमवायव्यतिरिक्तभावासंसर्गिणी॥ जातित्वात् गोत्ववदित्यपि प्रसंगपराहतत्वेनाप्रयोजकत्वादिति। समवायेवि
११ भागाभावाल्लक्षणप्रमाणनिरसनेनैव तन्निरासः सिद्ध इत्याह। समवायश्चेति तस्मात् कणादपरिकल्पितं द्वै
८५ तावभासेन नानाहेतसमवायस्याविरोध इत्युपसंहरन्नाह तस्मादिति॥ ॥२६॥ ॥ ॥ वैशेषिकादीरितभावत्र
दं नं स्काविता भेदविवर्जिताय सत्यार्थिनं संप्रति गौतमीयं प्रक्रम्यते कल्पितमंदर्शीग इदानीं नैयायिकमतेन
विरोधमुपपादयितुमाह यदि नैयायिकेनेत्यादिना। प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णय ८५
वादजल्पवितंडाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम इत्युद्देशसूत्रात् षोडशपदार्थाननुवद
न्ति तर्हि तेन तच्चमिति। उद्देशो लक्षणं परीक्षा चेति त्रिविधमन्यायशास्त्रस्थितिः विभागस्योद्देश एवांतर्भावात् तत्रोद्देशमा

व२

त्रेण पदार्थनियमासिद्धेर्लक्षणपरीक्षे वक्तव्ये ते च नोपपद्येते इत्येतदाह। तदपि दुर्निरूपमिति। प्रमासाधनानि प्र
माणानीति सूत्रमुपलभ्य यज्ञास वेद्धि न प्रमाणलक्षणं कल्पितं तन्वेन्नावदनुवदति। यत्राविदिति। स्मृतिसाधनव्यवच्छेद
यानुभवग्रहणं। संशयविपर्ययरूपानुभवसाधने दोषः निव्याप्तिपरिहाराय सम्यग्ग्रहणं। सम्यगनुभव शब्दार्थं विक
व्यरूपयति। तत्रेति स्मृतेरपि सत्यार्थप्रतिभासत्वात् साधनमपि प्रमाणं स्यादित्याह। प्रथमे स्मृताविति। ननु स्मृतेः
सत्यार्थप्रतिभासत्वे यद्यनुभवपदेन व्यावच्छेदा न तत्साधनस्य प्रमाणत्वप्रसंगः। न स्मृत्यनुभवयोर्भेदका भा
वात्। अथ संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति लक्षणात् स्मृतेरनुभवभेद इति तत्राह। स्मृतिः संस्कारेति। सं
स्कारमात्रजन्यत्वशब्देन कारणांतरजन्यत्वाभावो विवक्षितः किं वा असाधारण्येन संस्कारजन्यत्वं विवक्षि
तं। नाद्यः। स्मृतेरपि मनःसंयोगादिजन्यत्वात्। अन्यथा इंद्रियजन्यत्वाभावेन ज्ञानत्वं न स्यात्। न द्वितीयः। स एवाहमित्यात्म
प्रत्यभिज्ञानस्यापि स्मृतित्वापत्तेः तस्यापि स्मृतित्वापत्तेः। तस्यापि मनःसंयोगस्य साधारण्येन तत्र तस्यैवासाधारणेन
न संस्कारजन्यत्वादिति भावः। अथ मनःसंयोगस्य बाह्यघटादिज्ञानसाधारणत्वेपि नात्मज्ञानसाधारण्येन तत्र तस्यैवासाधा
रणत्वादतो नात्मप्रत्यभिज्ञानस्यासाधारण्येन संस्कारजन्यत्वमिति चेन्न। मनःसंयोगस्याज्ञातत्वे वाह्यज्ञानसाधारण

एपपिनज्ञाततयावाद्यज्ञानसाधारण्यंतत्रतस्यैवासाधारण्यत्वादतीतानस्मृतेरथसाधारण्येनसंस्कारजन्यत्वमितिलक्ष
णासीन्नायावायत्तेःसंस्कारस्यवज्ञानावच्छेदसाधारण्यवात्मप्रत्यभिज्ञानेपिसमम्वअस्त्तनहिदृष्टहीतज्ञानेस्मृतिरितिचेन्न
धारावाहिकविज्ञानेतिव्यापकत्वात्अथतत्रान्तरकालकालावच्छेदस्यपूर्वज्ञानाज्ञातस्यैवज्ञापनान्नातिव्याप्तिःत
र्हिस्मृतावप्यतीतकालावच्छेदस्याज्ञातस्यवज्ञापनादव्याप्तिरित्यस्तु।स्वविषयनियमसमानविषयत्वेनलक्षणज्ञानाप
१८ दंज्ञानंस्मृतिरितिचेन्नासदृत्यतकालावच्छे | दावगाहिस्मृत्याःपूर्वज्ञानस्यवर्त्तमानकालावच्छेदावगाहित्वे १८
८६ नाःसामानविषयत्वेनलक्षणासंभवापत्तेःस्मृ | थस्मृतेरतीतकालावच्छेदांशेपूर्वज्ञानानपेक्षत्वेपिवस्त्वंशे ८६
सापेक्षत्वान्नासंभवः।तर्हिप्रत्यभिज्ञानेऽतिव्या | प्तिःतस्याप्यतद्देशकालावच्छेदांशेऽनापेक्षत्वेपिवस्त्वंशा
सापेक्षत्वादितिचेन्नतर्हिस्मृतित्वजातिरूपलक्षणस्मृतिरितिवज्ञानार्थंनक्षप्रमाणयोरसिद्धेःसंस्कारमात्रजन्यत्वादेर्नि
रस्तत्वात्स्मृतित्वंसंभवःस्मरामीतिप्रतीतिप्रमाणज्ञानज्ञापनापार्विनिवंधनत्वान्नतत्रप्रमाणत्वमिति।आशंक्याथातम
थास्मृतिरनुभवस्यस्वरूपमुच्यते।स्मृत्यतिरिक्तंज्ञानमनुभवइतिवदन्तितत्राह।स्मृत्यतिरिक्तमिति।इत्यप्यसाधिति
पूर्वेणान्वयः।घटस्मरणस्यपटस्मरणाद्यतिरिक्तत्वेनतत्रातिव्याप्तिरितिशेषः।अथस्मृतित्वाभावाश्रयज्ञानमनु

नवइतिचेन्नतदर्पणाभूतेनतावदतिव्याप्तिरितास्वस्थाश्रंतस्याअपिस्मृतित्वान्योन्याभावाश्रयत्वात्स्मृतित्वसंसर्गाभावा
श्रयाज्ञानमनुभवइतिचेत्तत्रैवातिव्याप्तिःस्मृतेरपिस्मृतित्वसंसर्गान्योन्याभावाश्रयत्वात्।यदिस्मृतित्वसंसर्गसंसर्ग
भावाश्रयइतिविशेष्यतेतस्यनिवस्थापिकाःतिव्याप्तिस्मृतस्वस्थेतित्वसंसर्गमात्रप्रतियोगिकाभावोपिस्मृतित्वसंसर्ग
विशिष्टप्रतीत्यतिव्याप्तिस्वोहूपणीतरमाहइत्यपिप्रमाणेनेत्यादिना।इत्यपिशब्दस्यकाकाक्षिवत्संबंधोऽत्रज्ञेयः।किं
वाहेतागमस्यैवेत्यतःपूर्वस्यद्यार्थः।एवं | स्मृतावतिव्याप्तिमभिप्रायेदानीमनात्मप्रत्यक्षादावव्याप्ति
मात्ता।किंवाहेतेति।अनन्तमनःसर्वस्यावेमृत्य | चस्याक्षत्वात्वक्ष्यमाणत्वाच्चनतदनुभवसाधनप्रत्यक्षादि
सत्यार्थानुभवसाधनमित्यव्याप्तिरित्यर्थःहिती | यंप्रत्याख्यातिद्वितीयइति।धारावाहिकविज्ञानस्यापूर्वज्ञान
ज्ञातविषयत्वेनाज्ञातार्थप्रतिभासत्वाभावान्नतत्साधनंज्ञानार्थप्रतिभाससाधनमित्यव्याप्तिरित्यर्थःनन्वधारावा
हिकविज्ञानस्यान्तरकालावच्छिन्नाज्ञातवस्तुप्रतिभासत्वान्नतत्साधनेऽव्याप्तिरितिवादयन्ति।तत्रापीति।नैयायिका
मतेकालस्याप्रत्यक्षत्वान्तदवच्छिन्नस्यवस्तुनानप्रत्यक्षत्वेधारावाहिकविज्ञानवैधत्वमितिपरिहरन्ति।नकालस्येति
अथान्तरकालावच्छेदकोपाध्यवच्छिन्नवस्तुविषयत्वंधारावाहिनाविज्ञानस्यानिमतं।तथापिस्मृतावतिव्याप्तिःतस्या

अप्रतीतकालावच्छेदकोपाध्यवच्छिन्नाज्ञातवस्तुविषयत्वादिति। अपि वा अज्ञातत्वस्याप्रामाणिकत्वात्तद्विशेषितार्थ
प्रतिज्ञासाध्यप्रमाणिक इति विशिष्टलक्षणासंभवइत्यभिप्रेत्याह। किंच नतावदिति। किंज्ञाते घटेनदवच्छिन्नमज्ञात
त्वं ज्ञायते अज्ञाते वा। नाद्यः। घटज्ञातत्वकालविरोधादज्ञातत्वासंभवेनाज्ञातत्वावच्छिन्नघटज्ञानासंभवात्। न द्विती
यः। घटाप्रतीतौ तद्विशिष्टाज्ञातत्वाप्रतीतेः। न हि दंडाप्रतीतौ तद्विशिष्टप्रतीतिर्दृष्टेत्यर्थः। ननु घटज्ञातत्वकालेत
दज्ञातत्वं विरोधान्नावगम्यते यत्र दर्शितं पूर्वकाले । इवगम्यतां विरोधाभावादिति वादयति तर्हि ज्ञाते घट इति।
किं घटस्य ज्ञातत्वादन्यथानुपपत्त्या पूर्वमज्ञातत्वा। वगमः। किं वेदानीमेव ज्ञातत्वान्यथानुपपत्त्या नाद्यः।
स्मृति ज्ञाते पूर्वाज्ञातत्वादर्शनेनान्यथाप्युपपत्तेः । नोत्तरः। सिद्धपूर्वाज्ञातत्वे इदानीमेव ज्ञातत्वं सिद्ध्यति तस्मि
न्नेव तदन्यथानुपपत्त्या पूर्वाज्ञातत्वसिद्धिरिति परस्पराश्रयादित्याह। न तावदज्ञातत्वमात्रादित्यादिना। एवमज्ञातत्वे
प्रमाणासंभवमुपपाद्येदानीमज्ञातत्वस्य प्रमाणज्ञाप्यत्वकल्पने दोषमाह। प्रमाणज्ञाप्यत्वे वेति। यत्प्रमाणज्ञाप्यं न तत्प्रमा
णाहार्यं यथा स्तंभ इति व्याप्तेरित्यर्थः। अज्ञातत्वासंभवेनोपपादितं प्रमाणलक्षणासंभवमुपसंहरति तस्मादज्ञातत्वेति।
प्रमाणासातिरिक्तं ज्ञानं सम्यगनुभव इति पक्षे दोषमाह। तृतीये चेति। इदानीं साधनशब्दार्थानिरुक्त्या लक्षणं दूषय

त्यमाह। किं च सम्यगनुभवस्येति। धूमादेर्लिंगस्य ज्ञानं तावल्लिंगिसम्यगनुभवसाधनं तस्य च निर्व्यापारत्वेन व्यापारवत्का
रकत्वरूपकरणत्वासंभवेन प्रामाण्यं न स्यादित्याह। प्रथमे लिंगेति। ननु धूमादेरेव स्वपरामर्शव्यापारवतो लिंग्यनुभव
साधनत्वान्नाव्याप्तिदोष इत्याशंक्य नेत्याह। नैव लिंगस्य वेति। यदि धूमादेरेव लिंगस्यानुभवसाधनत्वं तर्हि नष्टधूमतत्कार्य
धूमसारादिदर्शनेन नष्टधूमस्यानुमापकत्वानुमानं न स्यात्। नष्टस्य करणत्वादर्शनादित्यर्थः। करणत्वानिरुक्तेश्च। किं कारकां
तरमसमाप्तव्यापारं करणं किं करणीकर्तृव्यापा रगोचरत्वाद्वा। यस्मिन्सति फलायोगव्यवच्छेदस्तद्वा व्यापारवत्त्व
सति फलायोगनिवारकं वा। अंत्यव्यापारं वा। यद भावकर्तृकर्मणी कार्यं नोत्पादयतस्तद्वा। नाद्यः। कर्मकारके
अतिव्याप्तेः। घटोऽयमिति ज्ञानकर्मकारकस्य घटस्य चक्षुःसंयोगव्यापारस्यापरस्य कारकांतरस्यापरिसमाप्तेः। न द्वि
तीयः। कर्तुः छेदनप्रयत्नव्यापारगोचरस्य शरीरादेरपि करणत्वप्रसंगात्। न तृतीयः। करणव्यापारे अतिव्याप्तेः। सामग्र्या
मतिव्याप्तेः। न चतुर्थः। फलायोगव्यवच्छेदकस्य फलायोगनिवारकस्य कर्त्रादिसाधारण्येन तद्व्यापनात्। समनंतरफलस्य
स्य फलायोगनिवारकस्य सामग्र्यामपि लब्धत्वेन तद्व्यापनात्। योगोदः। समनंतरफलत्वाभावेन तदव्यापनात्। न पंचमः। सा
मग्रीव्यापनात्। अनुमाकरणे धूमादिप्रत्ययस्य निर्व्यापारत्वेनोपव्यापारवत्त्वासंभवेन तदव्यापनाच्च। न षष्ठः। सामग्र्यामति

आप्तेरितिनचाशंकरणाद्युमादिचैत्ययत्रैवंयथातथा।प्रमाकरणंचप्रमाकारकनिष्ठधर्मानाश्रयप्रमाकारकनिष्ठधर्मस्या।
श्रयइतिवत्रातन्नास्वतःप्रामाण्यवादेइंद्रियादिस्वरूपस्यैवप्रमाकरणत्वेस्थितेनस्यचाप्रमासाधारणत्वेनलक्षणस्यासंभ
वात्प्रत्यक्षरूपप्रमाकर्मकारकव्यापनाच्च।सामग्र्यामतिव्याप्तेश्चाननुसामग्र्यानिर्व्यापारत्वेनकारकत्वाभावात्कथंतत्रातिः
व्याप्तिःनाव्यवहितपूर्वकालसंबंधस्यैवसामग्रीव्यापारत्वात्तस्मान्नसम्यगनुभवकरणंप्रमाणमितिसिद्धं।द्वितीयदोषमाह।द्विती
यइति।कालादेःसर्वकार्यसाधारणकारणत्वेन प्रमाकारणत्वात्तत्रातिव्याप्तिरित्यर्थः।उभयपदेसाधारणीदो
षमाह।किंचप्रमाणेतिप्रमाणसामान्यस्यनित्यत्वे २७८ नतदभावेऽनुभवानजायतइतिव्यतिरेकाभावान्नतस्यानुभव
साधनत्वमित्यसंभवालक्षणस्येत्यर्थः।ईश्वरादी नीश्वरज्ञानादिप्रमाकरणानीसम्यगनुभवशब्दवाच्यप्रमाकर।
णत्वस्यप्रमाणलक्षणस्यसाधारणत्वात्सामान्यलक्षणमिदमुच्यतेनप्रमाणसामान्यस्येतिपूर्वपक्षिणोमतमाह।अथप्र
माणशब्दानामितिदूषयति।तर्हीति।एवंनाव्यप्रमासाधनंप्रमाणमितिप्राचीनसर्वकल्पितंप्रमाणलक्षणंनिरस्येदानींय
दत्याद्युदयनेनयथादेवदत्तार्थानुभवोमानमनपेक्षतयेष्यतइतितदनुभवापेक्षतायालक्षणान्तरमिति।यथाशक्त्यानतिक्रमय
थाशक्तीतिसादृश्येवयथार्थदेवदत्ताभ्यर्थायमितिप्रयोगदर्शनादनुभवस्यापियथार्थत्वमर्थमनतिक्रम्यवर्त्तमानार्थेन।

न्य ३

सहस्थितिर्विवक्षिता।किंवायथार्थस्तथानुभवइतिसादृश्यविवक्षयासालंबनत्वंविवक्षितमिति।विकल्पदोषमाह।तत्रयथा
र्थत्वमिति।सुखाद्यनुभवस्यस्वार्थेनसुखादिनासहस्थितावपिघटाद्यनुभवस्यात्माश्रयस्यवहिःस्थितेनघटादिस्वार्थेनसह
स्थित्ययोगात्प्रथमेऽव्याप्तिरित्यर्थः।द्वितीयेदोषमाह।अर्थेत्रमादेविवितियस्मिंश्चाकारःप्रतिभातिसतदालंबनत्वाभावघटादि
मत्वंचसंशयविपर्ययरूपानुभवयोरपिसालंबनत्वात्तत्रातिव्याप्तिरित्यर्थः।तयोःसालंबनत्वेहेतुमाह।ज्ञायतेऽर्थइति।श्री
तिज्ञानस्यसालंबनत्वाभावघटादिज्ञानस्यापिनि रालंबनत्वप्रसंगमाशंक्याहृदयेति।तदुक्तमिति।किंचयथार्था
नुभवइत्यनुभवपदव्यवच्छेद्यंनपश्यामः।स्मृतिश्च ह्यवच्छेद्येतिचेन्न।नातस्याअपिप्रमाणत्वेबाधकाभावात्।स्मृते।
प्रमाव्यवहाराभावोबाधकमितिचेन्नलोकप्रमा व्यवहारस्यसत्यार्थज्ञानविषयत्वेनस्मृतावपिसंभवात्।यच्चोच्य
ताऽनीश्वरेच्छाप्रयुक्तप्रमाणव्यवहारःस्मृताविप्रसक्तस्तस्यात्रीतिमूलत्वात्।ईश्वरेच्छाप्रयुक्तप्रमाणव्यवहारस्यस्मृतौनेष्टः
प्रमाणस्वरूपाणियुक्तानीसर्वज्ञाभिमतानीकारणभक्षाक्षचरणस्मृतीनांस्मृतौप्रमाणव्यवहाराभावादिति।तदपिकल्पना
ह्याक्षचरणावनतर्कचरणान्भवाद्दृश्यानीवकुसुमितमेव।गुरूक्तावादरस्यशिष्यधर्मत्वात्तन्वस्माकंकणभक्षाक्षचरणा
द्यारेवप्रमाव्यवहारविसंवाददर्शनेनतदुक्तावश्रद्दधानामिति।यच्चकिंचिदत्राशंक्यतर्हिपूर्वानुभवसापेक्षत्वेनस्मृतेरप्रामा

५७

किंच कथमनुभवपदेन स्मृतेर्व्यवच्छेदः अनुभवपदवाच्यत्वानुभवत्वाभावादिति चेत् अनुभवस्याप्यनुभवत्वान्योन्याभावाश्रयत्वेन लक्षणासंभ
वापत्तेः। अथानुभवत्वसंसर्गाभावाश्रयत्वेन स्मृतेर्व्यवच्छेदः। न तथाप्युक्तरीत्या अनुभवत्वसंसर्गान्योन्याभावाश्रयत्वेन लक्षणासंभवस्य समानत्वात्

एवमिति चेत् न अनुमानस्यापि सापेक्षत्वेनाप्रमाण्यप्रसंगात्। अथ नानुमानस्य स्वबोध्यविशेषं प्रति सापेक्षता। तर्हि स्मृ
तेरपि तदंशेन सापेक्षतेति किं न दूयते। हस्ति च किं वा ज्ञानत्वावांतरसामान्यस्यानुभवत्वस्य कैकल्पकी अतिज्ञानं विहा
य ज्ञानेष्वनुभवपदप्रयोग इति चेत् अश्रमकाद्यनुभावि नो शास्त्रसंज्ञातज्ञातिस्तर्ह्यसुखप्रत्ययवदनुभवामीति प्रयोगा
भाव नत्वात्रानुभवपदप्रयोग इति चेत् व्याभावप्रसंगात् न च तत्र प्रमाचे नानुपेक्षत्वेति तर्हि अध्याघ्रेरविकथ्या श्ररलक्षणमपूर्व
८५ दृगिति भवत्वं कल्पी इतरेतराश्रयात् नेवाज्ञाता र्थत्वेन धारावाहीश्वरज्ञानादि प्रामाण्यापाताच्चा अथाज्ञाता ५
र्थत्वं समानार्थज्ञानानपेक्षत्वं तर्हि अध्याघ्रेरवि कथाश्ररलक्षणमपूर्वदृगिति निंदितापादानप्रसंगः। अनुभव
त्वं तावत्सिद्धमिति चेत् अनुभवव्यवहारस्य ज्ञातार्थोपाधिनिर्वचनत्वात् अन्यथानुभवत्वस्मृतित्वयोः सत्य
भिज्ञानसंकरापत्तेः। किं च यथार्थत्वविशेषणस्यानव्यवच्छेद्यं पश्यामः असत्यार्थप्रतिभासाव्यवच्छेद इति चेत् न। तस्या
विद्यादृष्टिनिमित्ताभ्युपगमेनानुभवपदेनैव व्यवच्छेदात् असत्यार्थत्वानिरुक्तेश्च। तथाहि किमसत्यत्वमर्थस्य तुच्छत्वं वा अनिर्वच
नीयत्वं वा अविद्योपादानत्वं वा देशकालांतरस्थितस्यान्यदेशादियोगो वा अनर्थक्रियाक्षमत्वं वा ज्ञानबाध्यत्वं वा। न प्रथम
कानलत्वात्। नाद्यः तुच्छस्य प्रतीत्यनर्हत्वेन तत्प्रतिभासास्यव्यवच्छेद्याभावप्रसंगात्। न द्वितीयः नीतिः तृतीयो रजतादेरस

५८२

त्यस्यानवद्विःश्रुथाभावानभ्युपगमात् अनवतुर्थः स्वदेहादेशस्थितस्यावस्वस्यप्युंडेऽनुभवस्यायथार्थत्वप्रसंगात् अथ देशांतरस्थित
स्य स्वाभाववद्देशयोगोऽसत्यत्वं तर्हि घटसंयोगस्य घटदेशस्थितस्य पटदेशसंयोगस्याप्यायथार्थेति चेन्न तदभावस्यैव नघो
सत्यार्थत्वं देशांतरस्थितस्य स्वसद्भावासदृक्स्थितस्याभाववत्स्थिदन्यदेशयोगोऽसत्यत्वमिति सा पृथ्वीरूपदेशसमवायस्याघ
टनसंबंधांतरानंगीकारेण घटदेशस्वाभावासदृक्स्थितस्वसंसर्याभाववति तदनुभवस्यासत्यार्थत्वप्रसंगात् सौस्वशब्दार्थानभ्यु
गमाच्च न पंचमः अर्थक्रियाक्षमस्य प्रकामित्यत्र अनवस्यस्यास्याव्यवच्छेदप्रसंगात् न षष्ठः ज्ञानबाध्यत्वं हि ज्ञा
ननिवर्त्यत्वं वा ज्ञानत्वाध्यसाभावप्रतियोगित्वं वा नाद्यः ज्ञाननिवर्त्यसुखाद्यनुभवस्याप्यसत्यार्थत्वप्रसंगात्
न द्वितीयः घटादेरपि ज्ञानबाध्याभावप्रतियो गित्वेन तदनुभवस्याप्यसत्यार्थत्वप्रसंगात् न सप्तमः नेयायि
कनार्थस्य ज्ञानाकारणत्वानंगीकारादिति। तस्माद्भूतिः प्रमाणमिति लक्षणांतरमन्यथाप्यगतदोषमतिदिशन्नाह यद
ध्यनुभूतिरित्यादिना। किंवा तच्चानुभूतित्वस्याप्रमालक्षणत्वेन तत्तद्योगावरस्य सर्वज्ञेश्वरज्ञानस्याप्रमाणत्वप्रसंग इ
ति प्रस्तावमुपसंहरति तस्मादिति॥ ॥२०॥ इदानीं प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रसिद्धं प्रमाणविभागं
निराकर्तुमाह न तस्मिं प्रबुद्धनिष्ट पद्धतिः प्रमाणविभागस्य प्रमाणस्वरूपसिद्ध्यधीनत्वात् तदसिद्धावसिद्धिरित्यर्थः। इदानीं

प्रत्येकं प्रत्यक्षादिप्रमाणं लक्षयितुमाह तत्रापीति तत्रेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्म
कं प्रत्यक्षमिति सूत्रं यतः शब्दमव्यपदेश्यमव्यभिचारि सविकल्पं प्रत्यक्षलक्षणमलक्षि तन्नाद्यं तद्दूषयति संशयविपर्ययरूपापरोक्षा
नुभवसाधनेऽतिव्याप्तिपरिहाराय सम्यग्ग्रहणं अनुमानादिव्यवच्छेदायापरोक्षग्रहणं योग्ययोगिप्रत्यक्षत्वेन प्रत्यक्षस्य
द्वैविध्यमाह तद्द्विविधमिति प्रकाशाद्यनुग्रहेणैव सम्यगपरोक्षानुभवसाधनमयोगिप्रत्यक्षमिति लक्षणं स्थूलार्थयोह
८० कमित्यनेन परमाण्वादिव्ययोगिप्रत्यक्षस्य षव शेनिषेधो विवक्षितः इन्द्रियार्थसंबंधेनेति व्यापारनिर्देशः संयो
गसंयुक्तसमवायसंयुक्तसमवेतसमवायसमवा यसमवेतसमवायविशेषणविशेष्यभावरूपषड्विधेनेन्द्रियार्थसंबं ८०
वस्य षट्प्रकारमाह संबंधश्चेति कार्यभेदप्रदर्श नेन संबंधस्य षट्प्रकारतां दर्शयन्नाह संयोगादित्यादिना यो
गिप्रत्यक्षं लक्षयति प्रकाशादिनैरपेक्ष्येण सम्यगपरोक्षानुभवसाधनं योगिप्रत्यक्षमिति लक्षणं स्वतीन्द्रियार्थग्राहकमिति
योगिप्रत्यक्षलक्षणस्यातीन्द्रियेषु परमाण्वादिषु प्रवेशप्रतिज्ञा धर्माकर्षादिति हेतुः इदमयुक्तं तदेतद्दूषयति तदपि प्रकृत्याभा
त्रमिति ईश्वरप्रत्यक्षाव्यापनादिदोषप्रसंगादिति शेषः तथाहि ईश्वरज्ञानं प्रमाणं वा स्यादप्रमाणं वा स्यात् न वा नान्त्यः नि
रपेक्षावाधितार्थत्वात् यदि प्रथमः तदापि किं प्रत्यक्षं तेनान्याहानेर्द्वितीयः स्वपरोक्षानुभवत्वात् पक्षः तर्हीश्वरज्ञा

प्रत्यक्षा प्रमा न प्रत्यक्षं प्रमाणं प्रमितिप्रत्यक्षं

अस्माकमपि स्वरूपज्ञानं न प्रमा नाप्यप्रमेति न प्रतिबंदियः २

नस्यापि सम्यगपरोक्षानुभवत्वेन तत्साधनत्वाभावात् अव्यापकं प्रत्यक्षलक्षणं स्यात् अथेश्वरज्ञानं किंतु तत्साधनमिति ब्रूषे तत्राब्रूहि
प्रमाकरणजन्यत्वमेतेनैव प्रमात्वाभिरुक्तेः ईश्वरज्ञानस्य नित्यत्वापलापप्रसंगात् किं सम्यगपरोक्षानुभवशब्देन सत्यार्थापरोक्षा
नुभवो विवक्षितः अपरोक्षप्रमा वा यद्याद्यः तदा सम्यगपरोक्षानुभवपदेनासत्यार्थापरोक्षानुभवो व्यवच्छेद्यः तथा चासत्यार्थ
त्वमिति निरुक्तिरसंभवान्न द्वितीयः अपरोक्षत्वप्रमात्वयोरनिरुक्तेः तथाहि किमपरोक्षत्वं जातिविशेषो वाऽपरोक्षाभावो वा इ
न्द्रियमात्रजन्यत्वं वा ज्ञातकारणाजन्यानुभवत्वं वा नाद्यः सोऽयं घट इति प्रत्यभिज्ञाने परोक्षत्वापरोक्षत्वयोः संकर
प्रसंगात् परोक्षत्वं यत्र परोक्षत्वव्याप्यनिवारणानुमादौ हि व्यापनादर्शनं परोक्षत्वव्याप्तिनिवारणे प्रत्यक्षेऽपि तयोः प्रत्यभिज्ञा
नकथं न संकरः इत्यतः अव्याप्यपरिहारेण भिन्नव्य क्तिनिवेशिनोः सामान्ययोः समावेशाज्जातिसंकरत्वमिति नापि
द्वितीयः परोक्षत्वं हि जातिविशेषो वा इन्द्रियमात्रजन्यत्वं वा नाद्यः प्रमात्वाप्रमात्वाभ्यां संकरापत्तेः नहि यत्र प्रमात्वं तत्र परोक्ष
त्वं प्रत्यक्षे निवारात् नापि यत्र परोक्षत्वं तत्र प्रमात्वं परोक्षत्वमेवानिवारात् एवमप्रमात्वेनापि निवारादुक्तः द्वितीयः इन्द्रियमा
त्रजन्यत्वेन साध्यमिति प्रत्यभिज्ञानस्य परोक्षत्वापत्तेः परोक्षत्वाभावस्याऽपरोक्षत्वस्येन्द्रियमात्रजन्यत्वापत्तेश्च स एव न तृतीयः सोऽय
मिति प्रत्यभिज्ञानस्यापरोक्षत्वाभावप्रसंगात् ईश्वरज्ञानस्य नित्यत्वेनेन्द्रियमात्रजन्यत्वाभावेनापरोक्षत्वाभावापत्तेश्चानवस्थः

अनुमायाः अथ ज्ञातपरामर्शकरणजन्यत्वेनाप्यतोऽव्याप्तेः नन्वज्ञात एव परामर्शोऽर्थः करणमिति वाच्यं व्यतिरेकाभावात् अत एव
प्रत्यक्षा प्रमा प्रत्यक्षमिति लक्षणान्तरमप्यपास्तं प्रमात्वमपि जातिविशेषो दुर्निरूपः अप्रमात्वेन संकरात् इदं रजतमिति ज्ञानस्येदमि
त्यंशः प्रमा रजतमित्यंशोऽप्रमेति कथं न संकरः प्रमात्वपरिहारेण अप्रमात्वस्य स्यात् भ्रमदर्शनात् अस्तु तर्हि इन्द्रियार्थसंनिकर्षो
त्पन्नमव्यभिचारि ज्ञानं प्रत्यक्षमिति चेन्न ईश्वरप्रत्यक्षाव्यापनात् । एतेन योगिप्रत्यक्षायोगिप्रत्यक्षलक्षणे निरस्ते इदानीं स
वंधस्य षड्विधत्वेऽपि न प्रमाणमित्याह प्रमाणे । ॰१॰ नावाक्षिति ।। नन्वद्व्यादिप्रमितिभेदः संबंधभेदे प्रमाणमित्यत
२१ आद्यप्रमितिकार्यस्येति द्व्यादिप्रमितिकार्यने दस्य सङ्ख्यादेः तन्न ग्राहकत्वशक्तिभेदेनाप्युपपद्यमानत्वात् षो २१
बाह्यासंबंधवादिनापि योग्यताया अवश्यापेक्षणे यद्वा अन्यथा वक्तुः संयोगादाकाशादेरपि ग्रहणप्रसंगादतो
नष्टोद्धासंबंधे प्रमाणमित्यर्थः यद्वा यतो आकार्यकारणद्वययोः संबंधः संयोग इति वक्तुः स्पर्शनाद्यो घटादिद्रव्यस्य संबंधः ८१
संयोग एवेति तदपि द्व्यादिनिरासेन निरस्तमित्याह द्व्यादेश्चेति एवं सारूप्येन संबंधपक्षं निरस्य इदानीं संयोगस्य प्रमितिहेतु
तां निराकुर्वन्नाह किंवासाविति वक्तुः पायः संयोगो व्यापारः स किं स्वविशिष्टघटप्रमां जनयति स्वोपलक्षिते वा आद्ये वक्तु
र्घटसंयोगस्य प्रत्यक्षत्वात् तद्विशिष्टघटस्य प्रत्यक्षत्वानुपपत्तिः इतरथा वक्तुः पिशाचसंयोगविशिष्टत्वात् तत्प्रत्यक्षत्वप्रसंगः संयो

गस्यापि विशेषणत्वे नयास्फुरणप्रसंगाद्वेति भावः द्वितीये दोषमाह द्वितीय इति कदाचिद्वक्तुः संयोगे घटस्य जाते तदुपलक्षि
तत्वस्य सर्वदा संभवात् सर्वदा घटप्रमा स्यादित्यर्थः अथ संयोगः स्वकाल एव स्वोपलक्षिते प्रमाहेतुरिति नोक्तदोषः तत्राह त
त्काले तदुपलक्षितत्वासंभवात् इदानीं संयुक्तसमवायस्य प्रमाहेतुत्वं निराकरणायाह किंवेति ननु रसस्यायोग्यत्वात् संयुक्तसमवा
येऽपि न वक्तुः पायग्रहणमिति नेत्याह न वेति केयं रूपादेरिन्द्रिययोग्यता रूपसंबंधे वा उद्भूतत्वं वा रूपत्वादि वा अ
तीन्द्रियः शक्तिविशेषो वा नाद्यो रसादेरपि रूप त्वसंबंधेनोद्भूतत्वेन वा चक्षुषा ग्रहणप्रसंगात् न तृतीयः रूपत्वादेर्वा
भिन्नाश्रितत्वात् न चतुर्थः अतीन्द्रियशक्तेरनंगीका रादित्यर्थः अनेन चक्षुःसंयुक्तसमवेतसमवायाद्रूपत्वग्रहणेऽपि रस
त्वग्रहणमपि स्यादित्यपि एतद्दूषणं समवायस्य शब्दप्रमाहेतुत्वं निराकरोति श्रोत्रेवेति । नैयायिकमते कर्ण
शष्कुल्यवच्छिन्नाकाशप्रदेशे विहायाप्यश्रोत्रस्याभावात् समवायाच्छब्दोपलंभे बधिरस्यापि कर्णशष्कुल्यवच्छिन्नाकाशप्र
देशसंभवात् तत्र च समवायाच्छब्दोपलंभः स्यादित्यर्थः ननु बधिरश्रोत्रे शब्दसमवायेऽपि न शब्दोपलंभस्तदुपलंभकादृष्टस्या
भावादिति तत्राह अदृष्टस्यैव कल्प्यादिति अदृष्टस्यावश्यकत्वं दृष्टकारणादेकल्प्य वहेतुत्वं तु अदृष्टकारणसाकल्ये सति कार्या
नुत्पत्त्या अन्यथा कदाचित् क्रियोत्पत्त्या अवयवस्याभावाद्विभागानुत्पत्तिप्रसंगादित्यर्थः इतश्च न श्रोत्रसमवायाच्छब्दोप

लंभइत्याह । ध्याविति । हितापलंभादिति । कर्णशष्कुल्यवच्छिन्नाकाशे श्रोत्रे समवायाच्छब्दोपलंभे कर्णदेशपवशब्दोपलंभः स्या
त्तथा च दूरस्थरूपं पश्यामीतिवद्दूरे शब्दमाकर्णयामीति प्रतिपत्तिर्न स्यादित्यर्थः ॥ ननु चक्षुर्वच्छ्रोत्रस्यापि प्राप्यकारित्वे कुत्र शब्द इति सं
देहानस्याग्रे न हि चक्षुषा रूपप्रतिपत्तौ कुत्र रूपमिति संदेहो दृष्ट इति तत्राह । संशयासंभव इति । कर्णशष्कुलीप्रदेशस्थसमवे
तशब्दोपलंभेपि संशयानस्यात्रेमनोनवधानादिना संदेह प्राप्यकारित्वेपि समानमित्यर्थः ॥ निश्चलाकाशप्रदेशस्यैव श्रोत्रत्वे म
रणकाले सर्वेंद्रियाणामुत्क्रांतिश्रुतिविनाश्यत्या हा सर्वे प्राणा इति । श्रवणेन च समवेतसमवायाच्छब्दत्वोपलंभेनत्वविं
८६ रस्यापि शब्दत्वोपलंभः स्यादित्यत आह । शब्दत्वेद नाभिभावस्य विशेषणविशेष्यभावेन चक्षुरादिना ग्रहणे निवा २४
रयन्निहाना भाव इति । ननु चक्षुःसंयुक्तभूतलानगो वि शेषणविशेष्यवासति घटे टाद्यभावोज्ञायते तदभावेन ज्ञायत
इत्यन्वयव्यतिरेकविभाय इत्यत आह । अन्यसंयोगस्यापि चक्षुःसंयोगस्याद्वायोगावरत्वान्न चक्षुःसंयुक्तभूतलामस्य विशे
षणस्य प्रत्यक्षतोपलक्षणमिति न तदन्वयव्यतिरेकोपजन्यत्वाविति न तद्विरोध इत्यर्थः ॥ ननु तथापि दृष्टश्रृंगस्य तुच्छत्वेन सर्वव्यव ८२
हारानर्हत्वासाध्यसाधनहीनो दृष्टान्त इत्यत आह । तुच्छस्यापि । विधिव्यवहारानर्हत्वं तुच्छलक्षणं न निषेधव्यवहारानर्हत्वमपि ।
तुच्छमनयविचयवहानार्हं न भवति । निषेधव्यवहारस्याप्यभावप्रसंगेन तुच्छे भूर्वीभावप्रसंगादतो नायं विकलो दृष्टान्त इत्यर्थः ॥

अथ योगिप्रत्यक्षं भंगमुपसंहरति । तस्मादिति । योगिप्रत्यक्षस्यातींद्रियार्थगोचरत्वं दूषयति । योगिप्रत्यक्षमिति । इंद्रियव्यापारमेव यो
गिप्रत्यक्षं गोचरयति । नातींद्रियमदृष्टादि तत्कोचरत्वे प्रमाणाभावादित्यर्थः ॥ योगींद्रियस्यातींद्रियार्थगोचरत्वे पुराणं वा कथमु
दाहृतमित्याशंक्याह । आदात्रेषामिति । योगिप्रत्यक्षस्यातींद्रियार्थगोचरत्वे नासर्वज्ञोदाहृतमनुमानमनुभाषते । यद्वदमिति । किम
त्रातींद्रियाणां सर्वेषामपि पक्षता एकस्य वा । तत्रार्थगोचरत्वे सर्वातींद्रियाणां केन प्रमाणेन निश्चयाना पि वक्तुमितिति संदिग्धा
श्रयासिद्धिरित्याह । तदश्रमानमित्यादिना । यद्येक स्यैवादृष्टस्य पक्षता । तदापीतरातींद्रियाणि कस्य वित्प्रत्यक्षाणि
नवा उभयथापि दोषमाह । तस्यैकस्यैव पक्षत्वमि त्यादिना दूषणं तस्मादृ ॥ किं चेति । तस्यार्थः । कश्चित्प्रविष्टदनु
नं किमस्मदादिविवक्षितः अतींद्रियार्थदर्शी वा । अ भिप्रेतो वा कश्चित् प्रथमे बाधः द्वितीयः प्रसिद्धविशेषणत्वं ।
तृतीयत्वेकस्य विच्छिद्यार्थस्याप्रसिद्धत्वं तद्विशेषिते प्रत्यक्षत्वमपि घटादावप्रसिद्धमित्यप्रसिद्धविशेषणत्वमिति । बाध्यवासिद्धिश्च
त्याह । विपक्षबाधक इति । ननु प्रमेयत्वपक्षेत्वयोः संबंधस्यानौपाधिकत्वात्प्रमेयत्वस्य परमाण्वादिषु प्रत्यक्षत्वपरिग्रहत्यागेनिभा
वपरित्यागित्वभावपरित्यागाधायकमिति चेन्न स्पर्शवद्द्रव्यप्रत्यक्षत्वे उद्भूतरूपवत्त्वं स्पर्शवत्त्वमिति महत्त्वस्यापाधित्वावनीरूपद्रव्यप्रत्यक्षत्वेन
